॥ श्रीजिनाय नमः ॥

# ॥ श्रीधम्मिल्लचरितं भाषांतरोपेतं ॥

( चतुर्थो भागः )

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

वीरसंवत्—२४४०. विक्रमसंवत—१९७१. सने—१९१४.

किं. रु.—३—८—०

☞ श्रीजैनभास्करोदय प्रेस. जामनगर.

Serving JinShasan
049530
gyanmandir@kobatirth.org

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ श्रीजिनाय नमः ॥

# ॥ अथ श्रीधम्मिल्लचरित्रं भाषांतरोपेतं प्रारभ्यते ॥

( चतुर्थो भागः )

( मूलकर्त्ता—श्रीजयशेखरसूरिः )

भाषांतरकर्त्ता— श्रावक मनसुखलाल हीरालाल हंसराज. ( जामनगरवाळा )

दध्यौ शीलवतीपार्श्वे । प्राणेशसुहृदोऽपि हि ॥ एकाकिन्या न मे तत्र । गंतुं रहसि युज्यते ॥ ५२ ॥ रहो हुतवहोदर्चि—करालां वीक्ष्य योषितं ॥ नृणां द्रवीभवत्येव । मनो मदनवन्मृदु ॥ ५३ ॥ आस्तां परपुमान् यूना । पित्रा भ्राता सुतेन वा ॥ एकाकिन्या सहैकांते । न

---

त्यारे शीलवतीए विचार्युं के त्यां मारा स्वामिना मित्रनीपासे पण मारे एकांतमां एकला जवुं योग्य नथी. ॥ ५२ ॥ केमके अग्निनी शिखासरखी भयंकर स्त्रीने एकांतमां जोइने पुरुषोनुं कोमळ मन मीणनीपेठे पीगळीज जाय छे. ॥ ५३ ॥ परपुरुष तो एक बाजु रह्यो, परंतु युवान ए-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्थातव्यं कुलस्त्रिया ॥ ५४ ॥ एषा कुलस्त्रीमर्यादा । तां न्यषेधयदेकतः ॥ प्रियप्रवृत्तिजिज्ञासां । पर्थ प्रेरयदन्यतः ॥ ५५ ॥ बाढं दृढमनस्कायाः । शक्रस्यापि न मे भयं ॥ विमृशंतीति सा चंद्रशालां शीलवती ययौ ॥ ५६ ॥ आकंठं कृतमिष्टभोजनमतो नासाग्रलम्नोदरं । सर्वांगं परिषिक्तचंदनरसं तांबूलताम्राधरं ॥ पल्यंके मृदुपुष्कलेऽजगरवद्वेल्लंतमेकाकिनं । सा तं संमुखमैक्षत द्विजवरं निद्रादरिद्रांबकं ॥ ५७ ॥ मंदैः पदैः समायांतीं । बिभ्यतीमिव वीक्ष्य तां ॥ मुक्त्वा शयनमुत्तस्थौ ।

वा पिता, भाइ तथा पुत्रसाथे पण कुलीन स्त्रीए एकांते रहेवुं नहि. ॥ ५४ ॥ एवी रीते एक बाजुथी कुलीन स्त्रीनी ते मर्यादा तेणीने अटकाववा लागी, अने बीजी बाजुथी पोताना स्वामिनो समाचार जाणवानी इछा प्रेरवा लागी. ॥ ५५ ॥ अत्यंत दृढ मनवाळी एवी मने इंद्रनो पण भय नथी, एम विचारती ते शीलवती उपले माळे गइ. ॥ ५६ ॥ ठेक कंठसुधी करेलां मिष्ट भोजनवाळा अने तेथी ठेक नाशिकाना अग्र भागसुधी फुलेलां पेटवाळा, सर्व शरीरे लींपेला चंदनरसवाळा, तांबूलथी लाल होठवाळा, अत्यंत कोमल पलंगपर अजगरनीपेठे आलोटता तथा निद्रारहित आंखोवाळा ते एकाकी ब्राह्मणने तेणीए सन्मुख पडेलो जोयो. ॥ ५७ ॥ बीकणनीपेठे

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सोमभूतिःससंभ्रमं ॥ ५८ ॥ मधुमत्तपिकीरावा । सावादीदथ तं द्विजं ॥ तवास्ति स्वागतं भद्र ।
भद्रं च प्रेयसो मम ॥ ५९ ॥ मत्प्रियस्य वयस्योऽसि । तस्य शुद्धिं निवेदय ॥ यत्किंचित्प्रेषितं
लेखा—दिकं तेन तदर्पय ॥ ६० ॥ द्विजराजस्ततः स्माह । द्विजराजप्रभां किरन् ॥ द्विजराजप्रति-
स्पर्द्धि—वदने स्वागतं मम ॥ ६१ ॥ दयितस्तव कल्याणि । कल्यः कल्याणभाजनं ॥ उपार्ज्य ध-
नमागंता । कालेन कियतापि सः ॥ ६२ ॥

---

तेणीने धीमे पगले आवती जोइने ते सोमभूति ब्राह्मण बिगानुं ओसीने संभ्रमसहित उभो थ-
यो. ॥ ५८ ॥ वसंत ऋतुथी उन्मत्त थयेली कोयलसरखा कंठवाळी ते शीलवती ते ब्राह्मणने क-
हेवा लागी के हे भद्र! तमो कुशले आव्या छो? अने त्यां मारा स्वामी तो कुशल छे? ॥५९॥
तमो मारा स्वामिना मित्र छो, माटे तेना समाचार कहो? अने तेणे जो कागलपत्रादिक कइं
आप्युं होय तो आपो? ॥ ६० ॥ त्यारे ते ब्राह्मण चंद्रसरखी कांतिने विस्तारतोथको बोल्यो के हे
चंद्रना प्रतिस्पर्धीमुखवाळी! हुं अहीं कुशलक्षेमे आव्यो छुं. ॥ ६१ ॥ वळी हे कल्याणि! मनोहर
अने कल्याणना स्थानसरखा ते तारा स्वामी धन उपार्जन करीने केटलेक काळे अहीं आवशे.॥६२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वहस्तलिखितो लेख—स्तव हृल्लेखकारणं ॥ हृदयाभरणं चान्यत् । प्राहीयेतां मृगाक्षि ते ॥
॥ ६३ ॥ एवं वार्त्तयतस्तां च । सर्वांगं तस्य पश्यतः ॥ विवेकरत्नमाछिंत्त । छलज्ञः स्मरदांभिकः ॥
॥ ६४ ॥ विप्रो दध्यावहो देहो—ऽमुष्या रूपांबुसागरः ॥ यत्रोध्दर्तुं दृशं मग्नां । बेम्रामीक्षे न कां
चन ॥ ६५ ॥ जैत्रभल्लेरनंगस्य । सर्वस्त्रैणशिरोमणेः ॥ न भाग्यमंतरेणास्या । लभ्यते संगमः कि
ल ॥ ६६ ॥ तन्मन्ये भाग्यवानस्मि । दरिद्रस्येव कामधुक् ॥ इयं मे स्वयमेवागा—दन्यथा हृ

वळी हे मृगाक्षि! तेणे पोताने हाथे लखेलो कागल तथा तारा हृदयने आनंद करनारुं पोताना हृदयनुं आभूषण तने आपवामाटे मोकल्युं छे. ॥ ६३ ॥ एम वात करतांथकां तथा तेणीनुं सर्व शरीर जोतांथकां छलने जाणनारा कपटी कामदेवे ते ब्राह्मणनुं विवेकरूपी रत्न छीनवी लीधुं. ॥ ६४ ॥ त्यारे ते ब्राह्मण विचारवा लाग्यो के अहो! आनुं शरीर तो रूपरूपी जलना समुद्रसरखुं छे, के जेमां बुडेली आ मारी दृष्टिने कहाडवामाटे मने कोइ पण होडी जोवामां आवती नथी. ॥ ६५ ॥ कामदेवनी जयभल्लीसरखी तथा सर्व स्त्रीओमां शिरोमणि एवी आ स्त्रीनो संगम खरेखर भाग्यविना मळे नहि. ॥ ६६ ॥ माटे धारुं छुं के हुं भाग्यशाली छुं, जो एम न

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्पथं कथं ॥ ६७ ॥ कंपस्वेदादिकान् भावान् । सात्विकान्नाटयन्नथ ॥ सोमभूतिः समुद्भिन्न—विकारस्तामभाषत ॥ ६८ ॥ लेखाद्यं तेऽरविंदास्ये । दास्येऽहं शृणुवदः पुनः ॥ लावण्यसरसि स्वांगे । मां क्रीडासारसीकुरु ॥ ६९ ॥ तस्येति दुःश्रवं श्रुत्वा । वचनं सा व्यचिंतयत् ॥ हंत यच्चिंतितं पूर्वं । तन्मे साक्षादुपस्थितं ॥ ७० ॥ पश्य मर्माविधं कर्म । स्मरवीरस्य कीदृशं ॥ श्रोत्रियं वा स्त्रियं वापि । यो निघ्नन्नैव मुंचति ॥ ७१ ॥ इदमन्यादृशं लोके । तामसं कामसंभवं ॥ मुह्यंत्येवंविधा य-

होय तो दरिद्रीने जेम कामधेनु तेम आ स्त्री पोतानी मेळेज मारीपासे क्यांथी आवे! ॥ ६७ ॥ पछी ते सोमभूति ब्राह्मण कंप तथा पसीना आदिक कामविकारना सात्विक भावोने प्रकट करतोथको कामातुर थइ बोल्यो के, ॥ ६८ ॥ हे कमलमुखि! हुं तने ते पत्रआदिक आपीश, परंतु एक वात सांभळ? लावण्यना तळावसरखां तारां शरीरमां मने क्रीडा करनार सारससरखो कर? ॥ ॥ ६९ ॥ एवी रीतनुं तेनुं नहि सांभळवालायक वचन सांभळीने ते विचारवा लागी के, अरे! पूर्वे में जे चिंतव्युं हतुं तेज साक्षात मारी नजरे आवी जड्युं. ॥ ७० ॥ अरे! जुओ तो आ कामसुभटनुं मर्मस्थानोने भेदनारुं केवुं कार्य छे! के जे वेद जाणनार ब्राह्मणने अथवा स्त्रीने पण

त्र । श्रुतदीपकरा अपि ॥ ७२ ॥ यदीदृशोऽपि कामी स्यात् । को दोषस्तर्हि दुर्धियां ॥ मग्नो यत्र जले नाग—स्तत्र छागस्य का कथा ॥ ७३ ॥ अथ कामतमस्तस्य । भेत्तुं चित्तगुहागतं ॥ वितेने वाङ्मयं ज्योति—र्दीप्रांगी दीपिकेव सा ॥ ७४ ॥ वर्णज्येष्ट कुलश्रेष्ट । विशिष्टश्रुतपारग ॥ किं प्राकृतजनक्षुण्णं । पंथानमनुवर्त्तसे ॥ ७५ ॥ अंतः कचवराकीर्णे । बहिश्च मसृणत्वचि ॥ खरीपुरीषसं-

पोताना फपाटमांथी छोडतो नथी. ॥ ७१ ॥ दुनियामां कामथी उत्पन्न थयेलुं आ अंधकार विचित्र प्रकारनुं छे, के जेथी ज्ञानरूपी दीपक हाथमां होवा छतां पण आवा माणसो दिग्मूढ बनी जाय छे. ॥ ७२ ॥ ज्यारे आवो माणस पण कामी थाय त्यारे बीजा दुर्बुद्धिजनो शो दोष छे? केमके जे जलमां हाथी डुब्यो त्यां बकरानी शुं वात करवी? ॥ ७३ ॥ हवे तेना मनरूपी गुफामां रहेला कामरूपी अंधकारने भेदवामाटे दीपकनीपेठे तेजस्वी शरीरवाळी ते शीलवती वचनरूपी प्रकाश विस्तारवा लागी के, ॥ ७४ ॥ हे उत्तम जातिकुलवाळा! तथा श्रेष्ट शास्त्रोना पारंगामी! नीच माणसोने योग्य एवा मार्गनुं तुं शामाटे अनुवर्तन करे छे? ॥ ७५ ॥ अंदर मलीन कचराथी भरेलां तथा बहारथी कोमळ चामडीवाळां एवां गधेडीनां लींडांसरखां स्त्रीनां शरीरमां तुं मो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

काशे । मा मुह्य स्त्रीशरीरके ॥ ७६ ॥ परस्त्रीसंगतिर्मान—भंगाय महतामपि ॥ ऋषिपत्नीरतेराप । किं फलं नाकिनायकः ॥ ७७ ॥ अधर्मकर्म यन्मूढ । कुरुषे यौवनांधितः ॥ अंतःस्थशिखिशाखीव । वीक्ष्यसे तेन वार्द्धके ॥ ७८ ॥ तदजस्रस्रवच्छास्त्रा—मृतधौतामलां निजां ॥ ईदृग्दुर्वाक्यपंकेन । रसनां मा कलंकय ॥ ७९ ॥ वाचस्तस्या इमा मेघ—मुक्ता आप इवोज्ज्वलाः ॥ न तच्चित्तडा-गेऽस्थुः । स्मरगोधेरंध्रिते ॥ ८० ॥ द्विजोऽवादीदिमा उक्ती—र्भद्रे संवृणु संवृणु ॥ वेद्मि सर्वमिदं

---

ह कर नहि. ॥ ७६ ॥ परस्त्रीनो संग महान पुरुषोना माननो पण भंग करे छे, केमके ऋषिपत्नी-ने भोगववाथी इंद्रने पण शुं फल मल्युं छे? ॥ ७७ ॥ वळी हे मूढ! यौवनथी अंध थइने जे तुं अधर्मनुं कार्य करे छे, तेथी वृद्धावस्थामां तुं अंदर रहेला अग्निवाळा वृक्षसरखो देखाइश. ॥ ॥ ७८ ॥ माटे निरंतर झरता शास्त्रामृतथी धोवावडे करीने निर्मल थयेली तारी पोतानी जीभने आवां दुर्वचनरूपी कादवथी कलंकित कर नहि. ॥ ७९ ॥ कामदेवरूपी गरनाळुं बंध नहि करवा-थी तेना चित्तरूपी तळावमां मेघे छोडेला जलसरखी तेणीनी आवी उज्ज्वल वाणी पण टकी शकी नहि. ॥ ८० ॥ त्यारे ते ब्राह्मण बोल्यो के हे भद्रे आ तारी वाणी हवे बंध राख, आ स-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किंतु । कामे वामे करोमि किं ॥ ८१ ॥ ततः क्लिष्टपरिणामं । वीक्ष्य तं विममर्श सा ॥ अस्य बोधौषधासाध्यो । ध्रुवं काममहामयः ॥ ८२ ॥ प्रत्युत विकारकारण—मुपदेशो विषयकलुषिते मनसि ॥ अश्मनि हुतवहदीप्ते । धूमोद्गाराय जलसेकः ॥ ८३ ॥ उपस्थितोऽस्ति तद्व्याघ्र—दुस्तटीन्याय एष मे ॥ कथमेष परिप्सय्यः । कथं पाल्यः स्वनिश्चयः ॥ ८४ ॥ लेखः पाणितले भूषा । भूषा चाभरणं हृदः ॥ शीले सर्वांगभूषायां । याति ताभ्यामलं मम ॥ ८५ ॥ इति निश्चित्य सावादी–द्यदू-

---

घणुं हुं जाणुं छुं, परंतु कामदेव विपरीत थवाथी हुं शुं करुं? ॥ ८१ ॥ पछी तेने दुष्ट अभिप्रायवाळो जोइने तेणीए विचार्युं के आनो कामदेवरूपी महारोग खरेखर प्रतिबोधरूपी औषधथी मटी शके तेम नथी. ॥ ८२ ॥ विषयोथी मलीन मनवाळाने आपेलो उपदेश उलटो विकार करनारो थाय छे, केमके अग्निथी तपेला पत्थरपर जल रेडवाथी उलटो तेमांथी धूमाडो पेदा थाय छे. ॥ ८३ ॥ माटे आ समये तो वाघ अने अगाध नदीसरखो न्याय मारेमाटे आवी पड्यो छे, आ ब्राह्मणने मारे शीरीते शांत पाडवो? तथा मारुं व्रत पण मारे शीरीते पाळवुं? ॥ ८४ ॥ पत्र तो हस्ततलनुं भूषण छे, अने हार हृदयनुं आभूषण छे, परंतु सर्व अंगनुं आभूषणरूप मारुं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चे सुजग त्वया ॥ तन्नाम कस्य नाजीष्टं । योवनद्रोः फलं ह्यदः ॥ ८६ ॥ प्रियस्य प्रियमित्रस्य । किमु जेदोऽस्ति कश्चन ॥ मानितोऽसि प्रियेण त्व–मतो मान्यो ममापि हि ॥ ८७ ॥ यत्प्रतीपं मया किंचि—दूचे तन्मास्म खिद्यथाः ॥ अजिप्रेतमपि प्रायो । निषिध्यंत्येकदा स्त्रियः ॥ ८८ ॥ परं सौम्य जनापाता—दत्र मे शंकते मनः ॥ ईयास्तदादिमे यामे । यामिन्या धाम मामकं ॥ ८९ ॥ काममूढेन तद्वाचि । तेन विश्वासमीयुषा ॥ विसृष्टा ववले साथ । पादैः सत्वरपातिजिः ॥ ९० ॥

---

शील जो जतुं होय, तो पढी मारे ते बन्नेनी जरुर नथी. ॥ ८५ ॥ एम निश्चय करीने ते बोली के हे सुजग! जे तें कह्युं ते कोने वहालुं न लागे? केमके यौवनरूपी वृक्षनुं तेज फल डे. ॥ ॥ ८६ ॥ शुं स्वामी अने स्वामीना मित्रवच्चे कइं तफावत डे? मारा स्वामिने तुं माननीक डे, माटे मारे पण तुं माननीकज डे. ॥ ८७ ॥ वळी हुं जे तारी सामुं बोली डुं तेथी तारे खेद करवो नहि, केमके प्रायें करीने स्त्रीज आवी मनगमती वातनो पण एक वखत निषेध करे डे. ॥ ८८ ॥ परंतु हे सौम्य! अहीं कोइ माणस आवी चडे माटे मारुं मन शंका पामे डे, माटे रात्रिने पहेले पहोरे तुं मारे घेर आवजे. ॥ ८९ ॥ कामथी मूढ बनेला ते ब्राह्मणे पण तेणीना वचनपर

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

दध्यौ च तावत्तरणि-र्धावत्यस्ताचलं प्रति ॥ तस्मिन्नस्तमिते विप्रो । निर्विवादं समेष्यति ॥ ८१ ॥
चिरत्नं शीलरत्नं मे । संरक्षिष्यति कस्तदा ॥ आत्मनैवात्मरक्षार्थे । यतितव्यं ततो मया ॥ ८२ ॥
निवासमेनसामेन—मथ शिक्षयितुं द्विजं ॥ तलारक्षस्य दुष्टानां । शासितुः सागमद् गृहं ॥ ८३ ॥
तस्याः कर्मवशात्सोऽपि । तदानीमेककोऽभवत् ॥ वीक्ष्य तामागतामेव । विव्यथे मन्मथेषुभिः ॥
॥ ८४ ॥ सा तलारक्षमाचख्यौ । प्रभावाद्भवतः प्रभो ॥ चौरा इव दिनेशस्य । न स्युरुर्व्यांखलाः ख-

---

विश्वास राखीने तेणीने जवानी रजा आपवाथी ते पण उतावळे पगले त्यांथी पाछो फरी, ॥८०॥
तथा विचारवा लागी के सूर्य तो अस्ताचलतरफ दोडी रह्यो छे, अने ते अस्त थयाबाद ब्राह्मण
तो खरेखर आवशेज. ॥ ८१ ॥ अने ते वखते घणा समयथी सांचवी राखेला मारा शीलरत्ननी
कोण रक्षा करशे? माटे हवे तो मारे पोतानेज मारा आत्माना रक्षणमाटे प्रयत्न करवानो छे.
॥ ८२ ॥ पछी पापोना निवासस्थानसरखा ते ब्राह्मणने शिक्षाए पहोंचाडवामाटे दुष्टोने शिक्षा क-
रनार कोटवालने घेर ते गइ. ॥ ८३ ॥ ते समये तेणीना कर्मवशे ते पण एकलोज हतो, अ-
ने तेथी तेणीने जोतावेंतज ते कामबाणोथी वींधावा लाग्यो. ॥ ८४ ॥ पछी तेणीए कोटवालने

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्वाः ॥ ९५ ॥ सोमभूतेः करे प्रैषि । लेखाद्यं प्रेयसा मम ॥ याचितो नार्पयत्येषो । यत्किंचिद्भा-
षते पुनः ॥ ९६ ॥ न्यायश्रीवल्लिपाथोदे । त्वयि धीमति जीवति ॥ द्विजो द्विजिह्वतां धत्ते । तदयं
शिक्षणोचितः ॥ ९७ ॥ अविग्रहग्रहावेश—विवशः सोऽपि तां जगौ ॥ पूर्वं स्वांगपरिष्वंग—रंग-
भाजं विधेहि मां ॥ ९८ ॥ पश्चात्तदैव दुर्दैवा—घ्रातं गौरि निगृह्य तं ॥ अहं महोपकारिण्या ।
भविष्याम्यनृणस्तव ॥ २६०० ॥ साथ दध्यौ हहा वाहात्—त्रस्ताहमवटेऽपतं ॥ निर्गत्य शृंखला-

कह्युं के हे प्रभो! सूर्यसरखा आपना प्रभावथी दुष्ट चोरो उपद्रव करता नथी. ॥ ९५ ॥ मारा
स्वामीए सोमभूति ब्राह्मणमारफते पत्रआदिक मोकल्युं छे, परंतु माग्या छतां ते आपतो नथी,
अने जेम तेम बोले छे. ॥ ९६ ॥ न्यायलक्ष्मीरूपी वेलडीने मेघसरखा एवा आप बुद्धिवान हैया-
त छतां पण ते ब्राह्मण बोलीने फरी जाय छे, माटे तेने शिक्षा करवी जोइये. ॥ ९७ ॥ त्यारे
कामविकारना आवेशथी परवश थयेलो ते कोटवाल तेणीने कहेवा लाग्यो के प्रथम तुं मने तारा
शरीरना आलिंगनना रंगवाळो कर? ॥ ९८ ॥ तथा पछी हे गौरी! तेज वखते ते दुष्टने मारी-
ने तारो महोपकारीनो हुं अनृणी थइश. ॥ २६०० ॥ त्यारे ते विचारवा लागी के अरेरे! हुं तो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्काष्ट—मयादाविशमायसां ॥ १ ॥ अयं हि चौरचक्रेभ्यो । रक्षन् पृथ्वीपतेः पुरं ॥ स्वपुरं स्मरचौरेण । लुंट्यमानं न पश्यति ॥ २ ॥ यदि निर्त्रपसर्यास्येन—मधुना मदनाकुलं ॥ तत्कुर्वतो बलात्कार—मस्य को नाम वारकः ॥ ३ ॥ उपायेनैव साध्योऽय—मिति ध्यात्वा जगाद सा ॥ द्वितीये यामिनीयामे । त्वमागच्छेर्गृहं मम ॥ ४ ॥ ततस्तेनापि मुक्ता सा । मुक्तपाशेव पक्षिणी ॥ निर्गत्य सत्वरं तस्य । भवनात्सचिवं ययौ ॥ ५ ॥ तस्यापि सदनांतःस्थ—स्येयं दृग्गोचरं गता ॥ खा-

घोमाथी मरीने खामामां पडी, तथा काष्टनी सांकळमांथी निकळीने लोखंडनी सांकळमां पडी. ॥ ॥ १ ॥ आ कोटवाळ राजाना नगरनुं चोरोथी तो रक्षण करे छे, परंतु कामरूपी चोरथी लुंटाता पोताना पुर एटले शरीरने तो जोतो नथी. ॥ २ ॥ जो आ कामातुरने हुं हमणा निर्लज्जीश तो आने मारापर बलात्कार गुजारतां कोण अटकावशे? ॥ ३ ॥ माटे आने पण उपायथीज शिक्षा करवी, एम विचारीने ते बोली के, रात्रिने बीजे पहोरे तारे मारे घेर आववुं ॥ ४ ॥ पछी तेणे पण मुक्त करेली एवी ते शीलवती पाशमांथी छुटेली पक्षिणीनीपेठे तुरत तेना घरमांथी निकळीने मंत्रीपासे गइ. ॥ ५ ॥ तेने पण घरमां बेठांज ते दृष्टिए पडी, तथा कामदेवना बाणोनी-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्रचक्रे स्मरज्वल्लीव । प्रविष्टा सहसा हृदि ॥ ६ ॥ त्वं पुरे मायिनां शूलं । मूलं सन्न्यायभूरुहः ॥ वि-
यामभंगुरं स्थान—मेवं तं सापनायत ॥ ७ ॥ एवमाह्लाद्य सा तस्मै । व्यसनाब्धितितीर्षया ॥ द्वि-
जन्मनस्तलारक्ष—स्यापि वृत्तं न्यवेदयत् ॥ ८ ॥ सोऽप्यवोचत यद्यस्ति । स्वार्त्तिं शमयितुं मनः ॥
तत् पूर्वं स्वांगसंगेन । मम कामार्तिमल्पय ॥ ९ ॥ अथ सा जातवैलक्ष्या । शीलक्षालितपातका
॥ तृतीयं प्रहरं रात्रे—स्तस्यागंतुमुपादिशत् ॥ १० ॥ शार्दूलस्य कुरंगीव । तस्य पार्श्वमपास्य सा ॥

पेठे तुरत तेना हृदयमां पेसीने ते खटकारो करवा लागी. ॥ ६ ॥ हे मंत्री! आप तो आ नगर-
मां कपटीजने शूलसमान, सन्न्यायरूपी वृक्षना मूलसरखा तथा बुद्धिना अविचल स्थानसरखा छो,
एम ते तेनी प्रशंसा करवा लागी. ॥ ७ ॥ एवी रीते तेने खुशी करीने दुःखरूपी समुद्र तरवानी
इच्छाथी तेणीए ते ब्राह्मण तथा कोटवालनुं वृत्तांत निवेदन कर्युं. ॥ ८ ॥ त्यारे ते पण बोल्यो
के जो तारे तारुं दुःख मटाड्वानी इच्छा होय तो प्रथम तारा शरीरना संगथी मारी कामपीडा ज-
छी कर? ॥ ९ ॥ त्यारे शीलथी धोयेलां पापोवाळी तेणीए विलखी थइने तेने रात्रिने त्रीजे प-
होरे आववानुं कह्युं. ॥ १० ॥ हरिणी जेम सिंहनुं तेम तेनुं पड्खुं छोडीने ते शीलवती बीजो

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

ततो राज्ञो ययौ धामो—पायांतरमविंदती ॥ ११ ॥ भवितव्यतया भूमि—भुजोऽप्येकाकिनस्तदा ॥ ऐंद्रजालिकविद्येव । दृष्टा सा मोहमातनोत् ॥ १२ ॥ सा तुष्टाव नृपं राजं—स्त्वं वर्णस्थापनागुरुः ॥ गतिस्त्वमेव दीनानां । जाते परपराभवे ॥ १३ ॥ मार्गमुच्चरमाणानां । काऽवेला खलहस्तिनां ॥ वज्रांकुशायते राज्ञा—माज्ञा चेन्न भयंकरी ॥ १४ ॥ सद्विजिह्वः क्व नाकौकः । कः स्वर्गो रंभयान्वितः ॥ क्वाब्धिर्मध्यमीनार्त्ति—दृश्या राज्यं क्व ते पुनः ॥ १५ ॥ परं तवापि सप्तांगे । राज्ये

---

उपाय न सुजवाथी राजाने घेर गइ. ॥ ११ ॥ भवितव्यताने योगे ते वखते राजा पण त्यां एकलोज हतो, तेथी इंद्रजालविद्यानीपेठे तेणीए तेने पण मोहित करी दीधो. ॥ १२ ॥ पछी तेणीए राजानी स्तुति करी के हे राजन्! तुं सर्व माणसोनो स्वामी छे, अने तेओने शत्रुओ तरफथी पराभव थती वखते तुंज शरणरूप छे. ॥ १३ ॥ भयंकर वज्रांकुशसरखी जो राजानी आज्ञा न होय तो नीच माणसोरूपी हाथीओने मार्गनुं उल्लंघन करतां शुं वखत लागे? ॥ १४ ॥ बे जीभवाळा (बोलीने फरी जनारा) एटले नागोथी भरेलो पाताल क्यां? तथा रंभाथी (अप्सराटीना भयथी) युक्त थयेलो स्वर्ग क्यां? अने अंदर मत्स्योनी पीडा जोनारो समुद्र क्यां? अने तारुं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धम्मि॰ दुष्टव्रणांत्यमी ॥ अपवित्रमुखा विप्र—तलारक्षकमंत्रिणः ॥ १६ ॥ किमिति क्ष्मानुजा पृष्टा । तेषां
सा॰ दुर्वृत्तमादितः ॥ ततः पृथ्वीपतेः कर्णा—ध्वन्यध्वन्यं व्यधत्त सा ॥ १७ ॥ शीतार्तवत्कंपमानः । स्म-
रेणाथ जगौ नृपः ॥ निग्रहीष्ये खलानेतान् । केऽमी कामिनि मत्पुरः ॥ १८ ॥ परं विधेहि मां
५६७ स्वांग—स्पर्शसौख्यविभागिनं ॥ तत्कर्णकीलमाकर्ण्य । वर्यधीर्विममर्श सा ॥ १९ ॥ कटरे पाति-
तास्म्येषा । संकटे कटुकर्मभिः ॥ ये रक्षका ममाभाग्या—द्भूवुर्विप्लवाय ते ॥ २० ॥ वृत्तिश्चेत्खा-

---

राज्य क्यां? ॥ १५ ॥ परंतु हे राजन्! आपना समांगी राज्यमां पण मलिनमुखवाळा ब्राह्मण, को-
टवाळ तथा मंत्री दुष्ट जखमसरखा छे. ॥ १६ ॥ ते केवी रीते? एम राजाए पूछवाथी तेणीए प्र-
थमथी मांडीने तेओनुं दुराचरण राजाने कही संभळाव्युं. ॥ १७ ॥ त्यारे जाणे टाढ चडी होय
नहि तेम कामथी कंपतो राजा बोल्यो के हे कामिनी! हुं ते दुष्टोने मारी नाखीश, केमके तेओ
मारी आगळ शुं हिसाबमां छे? ॥ १८ ॥ परंतु मने तारा शरीरना स्पर्शना सुखवाळो कर? एवी
रीतनुं कर्णोमां खीला ठोकवासरखुं तेनुं वचन सांभळीने ते शुद्ध बुद्धिवाळी शीलवती विचारवा
लागी के, ॥ १९ ॥ अरेरे! मारां दुष्कर्मोए मने महासंकटमां नाखी छे, केमके मारां अभाग्यथी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दति क्षेत्रं । चेन्निहंति पिता सुतं ।। जलं चेज्ज्वालयत्यंगं । दीपः किरति चेत्तमः ।। २१ ।। चेन्मुंचति घनोंगारां—श्चेन्मज्जयति तारकः ।। राजा चेत्कुरुतेऽन्यायं । का तत्र स्यात्प्रतिक्रिया ।। २२ ।। रूपं मूलमनर्थानां । मयि किं विदधे विधे ।। मांसलत्वमजाया हि । पराभवनिबंधनं ।। २३ ।। परीक्षां मम शीलस्य । किं कुर्वन्नसि दैव रे ।। यदमून् रागिणो राग-दुर्विधायां मयि व्यधाः ।। २४।। निविशे वायुविवशे । वह्नौ जक्षिमि वा विषं ।। म्रिये जिह्वामपि छित्वा । शीलं लुंपामि नो पुनः

---

जे रक्षको छे तेज मारो विनाश करवाने तत्पर थया छे. ।। २० ।। केमके जेम वाड पोतेज जो खेतरने खाय, पिताज जो पुत्रने मारे, जलज जो शरीरने बाळे, अने दीपकज जो अंधकार करे, ।। २१ ।। मेघ जो अंगारानी वृष्टि वरसावे, तारुज जो डुबाडे, तेम जो राजाज अन्याय करे तो पछी त्यां शुं इलाज करी शकाय!! ।। २२ ।। वळी हे विधाता! अनर्थोना मूलजेवुं मारुं रूप तें शामाटे बनाव्युं? केमके बकरीनुं पुष्टपणुं तेना पोतानाज पराभवना कारणरूप छे. ।। २३ ।। रे दैव! तुं शुं मारां शीलव्रतनी परीक्षा करे छे? के जेथी विरक्त एवी जे हुं तेनाप्रते आ लोकोने तें रागी बनाव्या छे. ।।२४।। वायुथी वृद्धि पामेला अग्निमां पडीश, फेर खाइश, अथवा जी-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ २५ ॥ वृथानुशिष्टिरप्यत्र । वृष्टिर्दग्ध इव द्रुमे ॥ अयं बोधयितुं शक्यो । न महोपक्रमं विना ॥
॥ २६ ॥ ध्यायंतीमिति तामेक-चित्तां वीक्ष्य विचक्षणः ॥ ममोत्तरं न दत्से कि-मित्यभाषिष्ट भू-
पतिः ॥ २७ ॥ स्वप्रतिष्ठाधिकं प्राप्य । प्रसादं तव भूधव ॥ उत्पिंजलाभवं तेन । शून्येवास्मीति
सावदत् ॥ २८ ॥ यत्त्वयाभाषि भूपाल । तत्स्त्रीणामतिसंमतं ॥ स्पर्शो दूरेऽस्तु भाग्येन । लभ्या
वागपि तावकी ॥ २९ ॥ परमत्रावयोः क्रीमा—सक्तयोरमले कुले ॥ जनापवादो भविता । स हि

भ कचरीने पण मरी जइश, परंतु मारां शीलने हुं खंडित करीश नहि. ॥ २५ ॥ बळेलां वृक्षप्रते
जेम मेघवृष्टि तेम आ राजाने प्रतिबोध आपवो नकामो छे, मोटा उपायविना आने समजावी श-
काय तेम नथी. ॥ २६ ॥ एम विचारमांज एक चित्तवाळी तेणीने जोइने ते हुशियार राजा बो-
ल्यो के तुं मने उत्तर केम आपती नथी? ॥ २७ ॥ त्यारे ते बोली के हे राजन्! गजा उपरांत
मारापर आपनी कृपा थवाथी हुं हर्षघेलीनीपेठे शून्यजेवी थइ गइ छुं. ॥ २८ ॥ वळी हे राजन्!
आपे जे कह्युं छे ते स्त्रीओने अतिप्रिय होय छे, आपनो स्पर्श तो एकबाजु रह्यो, परंतु आपसाथे
वात करवानुं पण भाग्यथीज मळे छे. ॥ २९ ॥ परंतु आपणे जो अहीं विषयक्रीडामां आसक्त

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रक्ष्यः प्रयत्नतः ॥ ३० ॥ तदद्यैव निशीथिन्यां । तुर्ये यामे ममालयं ॥ देवपादाः समायांतु । केना-
प्यनुपलक्षिताः ॥ ३१ ॥ नृपेनाथ विसृष्टा सा । सौवं सद्म स्यादयात् ॥ विमृश्य कंचनोपायं । श्व-
श्रूमेवमवोचत ॥ ३२ ॥ मातरद्य निशि प्रत्या—सन्ने त्वं निवसेर्गृहे ॥ प्रगेऽरुणोदयात्पूर्व—मीयाः
सापि तथाकरोत् ॥ ३३ ॥ विनातिमहतीमेकां । मंजूषां शीलवत्यपि ॥ समस्तं गृहवस्तु स्वं । न्य-
स्यदासन्नवेश्मनि ॥ ३४ ॥ पिनद्धशीलसन्नाहा । धीरिमोड्डुनधारिणी ॥ सुभटीव स्वयं सत्व—धाम

थशुं तो आपणा निर्मल कुलमां लोकापवाद थशे, माटे तेनुं आपणे प्रयत्नपूर्वक रक्षण करवुं जोइये. ॥ ३० ॥ माटे आजेज रात्रिने चोथे पहोरे आपे कोइ पण जाणे नहि तेम मारे घेर पधारवुं. ॥ ३१ ॥ हवे राजाए रजा आपवाथी ते तुरत पोताने घेर आवी, तथा कइंक उपाय चिंतवीने तेणीए सासुने कह्युं के, ॥ ३२ ॥ हे माताजी! आजे रात्रिए तमारे आ नजीकना घरमां रहेवुं, तथा प्रभाते सूर्योदय पहेलां अहीं आववुं, त्यारे तेणीए पण तेमज कर्युं. ॥ ३३ ॥ पछी एक मोटी पेटीशिवायनी सघली पोताना घरनी वस्तु शीलवतीए ते नजीकना घरमां मेली दीधी. ॥ ३४ ॥ पछी पोते शीलरूपी बखतर पहेरीने तथा धैर्यतारूपी उम्मवानुं साधन धरनारी ते महा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धामन्यवस्थिता ॥ ३५ ॥ इतश्च तदहःशेषं । द्विजस्य युगवद्ययौ ॥ सह तस्य विवेकेन । प्रापद-
स्तं दिवाकरः ॥ ३६ ॥ यथा यथा वितस्तार । जुवि वैज्ञावरं तमः ॥ पौष्पायुधं तमस्तस्य । हृदयेऽ-
पि तथा तथा ॥ ३७ ॥ तथा च लब्धावसरः । प्रसरप्राप्तदुर्मतिः ॥ अस्या अगारं शृंगार—ज्ञासुरो
द्विजराड्ययौ ॥ ३८ ॥ समाया तं समायातं । कृतकृत्रिमसंभ्रमा ॥ सामोहयत् प्रियालाप—नीचैर्वृ-
त्त्यासनार्पणैः ॥ ३९ ॥ नाज्ञासीत्कामलुब्धोऽसौ । तस्याः कपटपाटवं ॥ गीतासक्तो मृग इव । वी-

---

हिमती शीलवती पोते सुजटीनीपेठे घरनी अंदर रही. ॥ ३५ ॥ हवे ते दिवसनो बाकीनो जाग
ते ब्राह्मणनो युगनीपेठे गयो, एवामां तेना विवेकसाथे सूर्य पण अस्त पाम्यो. ॥ ३६ ॥ पढी जे-
म जेम पृथ्वीपर रात्रिनो अंधकार विस्तार पाम्यो, तेम तेम तेना हृदयमां कामदेवसंबंधी अंधकार
पण वृद्धि पाम्यो. ॥ ३७ ॥ पढी अवसर थवाथी अने दुर्बुद्धि पण विस्तार पामवाथी शृंगारथी दे-
दीप्यमान थइने ते ब्राह्मण तेणीने घेर गयो. ॥ ३८ ॥ त्यारे ते कपटी शीलवती पण तेने आ-
वेलो जाणीने जूठा संभ्रमपूर्वक प्रियवचनोथी नीचे नमी आसन आपी तेने मोहित करवा ला-
गी. ॥ ३९ ॥ ते कामलुब्ध ब्राह्मण तेणीनी आ कपटक्रिया जाणी शक्यो नहि, केमके गीतमां

तंसं व्याधकल्पितं ॥ ४० ॥ वध्वेव वार्त्ताः सरसाः । सोऽकार्यत तथा तया ॥ यथाबुध्यत दुर्बुद्धि-
र्न यांतीमपि यामिनीं ॥ ४१ ॥ अद्य ते प्रियमित्रस्य । चिराद्गृहमुपेयुषः ॥ क्रियते या मया भ-
क्तिः । सा सर्वापि तनीयसी ॥ ४२ ॥ इत्युक्त्वा स्नानसामग्रीं । लघुहस्ता व्यधत्त सा ॥ ततो वि-
प्रोऽप्यभिप्रेत—प्राप्तप्रत्ययभूरभूत ॥ ४३ ॥ अहो कीदृग्विवेकोऽस्या । अहो स्नेहलता मयि ॥ नी-
तो ध्यायन्निति स्नान—पीठं स शठया तया ॥ ४४ ॥ निषिद्धमपि रात्रौ स । स्नानं तस्या गिरा-

---

आसक्त थयेलो हरिण पारधीए पाथरेला पाशने जाणी शकतो नथी. ॥ ४० ॥ पछी स्त्रीनीपेठे
तेणीए तेने रसयुक्त वार्तालापमां एवो तो गरकाव करी दीधो के जेथी ते दुर्बुद्धीए जती रात्री-
ने पण जाणी नहि. ॥ ४१ ॥ आजे घणे काळे घेर आवेलो अने मारा स्वामीनो मित्र एवो जे
तुं, तेनी हुं जे भक्ति करुं ते थोडी छे. ॥ ४२ ॥ एम कहीने तेणीए तुरतातुरत तेने स्नान कर-
वानी सामग्री तैयार करी, त्यारे ते ब्राह्मण पण मनोवांछितनी प्राप्तिमाटे खातरीवाळो थयो. ॥
॥ ४३ ॥ अहो! आनो विवेक केवो छे! मारामां तेणीनुं स्नेहालपणुं केवुं छे! एम विचारता ते
ब्राह्मणने ते चालाक शीलवती स्नान करवाना बाजोठपर लावी. ॥ ४४ ॥ पछी तेणीना कहेवा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

करोत ॥ वशापरवशाः प्राय—श्चेटवत्किं न कुर्वते ॥ ४५ ॥ तयाभ्यक्तः स्वयं याव—दर्द्धस्नातो बभूव सः ॥ अतिचक्राम यामिन्याः । प्रहरस्तावदादिमः ॥ ४६ ॥ तदा च दत्तसंकेत—स्तलारक्षः स्मरातुरः ॥ विमुच्यापरकार्याणि । तद्गृहद्वारमाययौ ॥ ४७ ॥ वितेने तेन खाट्कारो । दृढदत्तकपाटयोः ॥ हृदयं खाट्करोतिस्म । पुनस्तस्य द्विजन्मनः ॥ ४८ ॥ स्वकर्त्तव्यसमुद्भूत—भयभ्रमितलोचनः ॥ विप्रस्तामथ सिप्राक्षी—मप्राक्षीद् द्वारि कोऽस्ति ते ॥ ४९ ॥ साप्यवोचदमुं मन्ये । त-

थी रात्रिए निषेधेलुं स्नान पण तेणे कर्युं, केमके प्रायें स्त्रीथी परवश थयेला पुरुषो दासनीपेठे शुं करता नथी? ॥ ४५ ॥ पछी तेणीए तेना शरीरपर तेलआदिक चोल्याबाद ज्यारे ते पोते अर्धे नाहेलो थयो तेवामां रात्रिनो पहेलो पहोर व्यतीत थयो. ॥ ४६ ॥ ते वखते संकेत आप्याथी कामातुर बनेलो कोटवाल बीजां कार्यो छोडीने तेना घरने बारणे आव्यो. ॥ ४७ ॥ पछी तेणे तो मजबूत बंध करेलां ते बारणापर खटकारो कर्यो, परंतु ते ब्राह्मणना हृदयमां खटकारो थवा लाग्यो. ॥ ४८ ॥ पोताना आवी रीतनां कार्यथी भयभ्रांत थयेलां लोचनवाळो ते ब्राह्मण ते कमलमुखीने पूछवा लाग्यो के तारे बारणे वळी आ कोण आव्यो छे? ॥ ४९ ॥ त्यारे ते पण बो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लारक्षं विचक्षण ॥ इयत्यामेव वेलायां । नित्यं मदगृहमेत्यसौ ॥ ५० ॥ त्रस्यंस्तस्याभिधातोऽपि । जांगुल्या इव पन्नगः ॥ स क्षीणविषयाकांक्षा-विष एवं व्यचिंतयत् ॥ ५१ ॥ कुधीरधीतशास्त्रस्या—प्यहो केयमभून्मम ॥ मित्रस्यापि कलत्रं य-दत्रपोऽहमचीकमं ॥ ५२ ॥ यदीमां पूर्वमज्ञास्य-मारक्षस्य परिग्रहे ॥ तन्नाधास्यां मनोऽप्यस्यां । सभुजंगे निधाविव ॥ ५३ ॥ इहायातं विधिवशा—द्यदि मामेष ज्ञोत्स्यते ॥ तत्सर्वस्वापहारेऽपि । जीवंतं नैव मोक्ष्यति ॥ ५४ ॥ ध्यायन्निति तयोचे स

---

ली के हे विचक्षण! हुं धारुं छुं के ते कोटवाल छे, केमके आज वखते ते हमेशां मारे घेर आवे छे. ॥ ५० ॥ गारुडीना नामथी जेम सर्प तेम तेना नामथी पण डरेलो ते ब्राह्मण विषयनी इछारूपी झेर क्षीण थवाथी विचारवा लाग्यो के, ॥ ५१ ॥ अरे! शास्त्रो भणेला एवा पण मने आ कुबुद्धि क्यांथी पेदा थइ! के में निर्लज्ज थइने मित्रनी स्त्रीसाथे विषयवांछा करी! ॥ ५२ ॥ अरे! मने जो प्रथम खबर होत के आ कोटवालनी राखेली छे! तो सर्पवाळा निधानमां जेम तेम हुं आ स्त्रीमां मारुं मन पण धारत नहि. ॥ ५३ ॥ हवे कर्मयोगे जो मने ते अहीं आवेलो जाणशे तो मारी सर्व मील्कत लुंटीने पण ते मने जीवतो छोडशे नहि. ॥ ५४ ॥ एम विचार-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

। मा भैः स्वस्थो भव द्विज ॥ यास्यत्यसौ क्षणं स्थित्वा । निशास्त्यद्यापि भूयसी ॥ ५५ ॥ मंजू-
षायास्तावदस्या । वक्षारं गह्वरोपमं ॥ क्षणमध्यास्व सोऽपि द्रा—क्समुत्थाय तथाकरोत् ॥ ५६ ॥
प्रयत्नोपार्जितद्रव्य । इव विप्रे निधीकृते ॥ ददौ श्रेष्ठिप्रिया प्रीता । वक्षारे तत्र तालकं ॥ ५७ ॥
शंकासंकुचितस्तत्रा—नंतसंतमसि द्विजः ॥ स तस्थौ भाविनरका—वस्थामनुभवन्निव ॥ ५८ ॥
अथोद्घाट्य कपाटौ सा । तलारक्षमवेशयत् ॥ धीवंध्यस्य द्विजस्येव । भक्तिं तस्याप्यदर्शयत् ॥

मां पडेला ते ब्राह्मणने शीलवतीए कह्युं के हे ब्राह्मण तुं धीरज राख? ते तो अहीं क्षणवार र-
हीने चाल्यो जशे, अने हजु रात्री तो घणी छे. ॥५५॥ माटे तुं आ पेटीना गुफासरखा खानामां
क्षणवारसुधी बेशी जा? त्यारे तेणे पण जलदी उठीने तेमज कर्युं. ॥ ५६ ॥ महेनतवडे उपा-
र्जन करेलां धननीपेठे ते ब्राह्मणने पेटीमां पूरीने खुश थयेली शीलवतीए ते खानाने ताळुं आ-
प्युं. ॥ ५७ ॥ ते अनंता अंधारावाळा खानामां पोताने थनारी नरकनी अवस्थाने जाणे अनुभ-
वतो होय नहि तेम ते ब्राह्मण शंकाथी संकोचाइने तेमां बेठो. ॥ ५८ ॥ पछी कमाड उघाडीने
तेणीए कोटवाळने घरमां दाखल कर्यो, तथा ते ब्राह्मणनीपेठे ते बुद्धिहीन कोटवाळप्रते पण ते-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ५९ ॥ प्राग्वद्वार्त्ताविनोदेन । जातो वेलाव्यतिक्रमः ॥ सा तं स्नपयितुं स्नान—पीठेऽन्यस्मि-
न्यवीविशत् ॥ ६० ॥ अर्द्धस्नाते गतस्तस्मिन् ॥ द्वितीयः प्रहरो निशः । अस्तनिद्रस्तदा मंत्री । त-
त्सद्म छन्नमाययौ ॥ ६१ ॥ द्वारि खाट्कारिते तेन । कपाटपुटके शनैः ॥ किमेतदिति संभ्रांत—स्वां-
तः पप्रछ तामसौ ॥ ६२ ॥ तया प्रोक्ते महामात्ये । किं कर्त्तव्यतयाकुलः ॥ कलविंक इव श्येना—
त्तस्माद् बाढं बिभाय सः ॥ ६३ ॥ सोऽक्षेपि वेपमानोऽर्ध—स्नातो निष्णातया तया ॥ घोरांधकारे

---

णीए त्नक्ति देखाडवा मांमी. ॥ ५९ ॥ पछी पूर्वनीपेठे वार्तांविनोदमांज वखत चाल्यो गयो, त्या-
रबाद तेने स्नान करावबामाटे तेणीए बीजा बाजोठपर बेसाड्यो. ॥ ६० ॥ ज्यां ते अरधुं स्नान
करी रह्यो एवामां रात्रीनो बीजो पहोर व्यतीत थयो, त्यारे निद्रा उडी जवाथी मंत्री गुप्त रीते
तेणीने घेर आव्यो. ॥ ६१ ॥ पछी तेणे बारणामां धीरेथी कमाड ठोक्याथी आ वळी शुं छे ? ए-
म मनमां संभ्रांत थइने कोटवाळे तेणीने पूछ्युं. ॥ ६२ ॥ त्यारे तेणीए महामंत्रीनुं नाम लीधा-
थी बाजथी जेम चकलो तेम तेनाथी ते अत्यंत डरवा लाग्यो. ॥ ६३ ॥ पछी ध्रुजता तथा अर्ध
करेल स्नानवाळा ते कोटवालने ते चतुर शीलवतीए घोर अंधकारवाळा पेटीना बीजा खानामां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वद्वारे । मंजूषाया द्वितीयके ॥ ६४ ॥

प्रवेश्याथ प्रियालापै—र्विनोद्यैष तयास्नपि ॥ यावन्मंत्री व्यतीयाय । तावद्यामस्तृतीयकः ॥ ॥ ६५ ॥ तुरीयप्रहरस्यादौ । प्रदत्तावसरस्तया ॥ कल्पांतेऽब्धिरिवोदस्था—दुन्मर्यादो महीधवः ॥ ॥ ६६ ॥ ध्वांतसाधर्मिकपट—च्छन्नकायो निरायुधः ॥ अनुपानहपदैकः । स्वसौधान्निरगान्नृपः ॥ ६७ ॥ नाजिज्ञपत्परीवारं । नाप्राक्षीत्कुलमंत्रिणः ॥ किंतु कामग्रहग्रस्तः । प्रस्थितः स्वयमेव सः ॥ ६८ ॥

---

पूरी दीधो. ॥ ६४ ॥

पछी तेणीए मंत्रीने प्रवेश करावीने तथा प्रिय वचनोथी खुश करीने जेवामां स्नान कराववा मांड्युं, तेवामां रात्रीनो त्रीजो पहोर व्यतीत थयो. ॥ ६५ ॥ हवे चोथा पहोरनी आदिमां तेणीए वखत आपेलो होवाथी कल्पांतकाळना समुद्रनीपेठे मर्यादा तजीने राजा उठ्यो. ॥ ६६ ॥ अंधकारसरखां वस्त्रथी शरीर ढांकीने हथियार तथा पगरखांविनानो एकाकी राजा पोताना महेलमांथी निकळ्यो. ॥ ६७ ॥ तेणे परिवारने जणाव्युं नहि तथा कुलमंत्रीओने पूछ्युं नहि, परंतु कामातुर थयोथको ते पोतेज त्यांथी चालवा लाग्यो. ॥ ६८ ॥ परवश थइने भयभीत दृष्टिथी दशे

दृशा भयस्पृशा पश्य—न्नवशः स दिशो दश ॥ छन्नछन्नैः पदैश्चौर । इवानीये चतुष्पथं ॥ ६९ ॥
नासापुटस्फुरच्छ्वास —स्तस्या आसाद्य सद्म सः ॥ आघोटयन्नखैर्द्वारा—ररीं स्मररुजातुरः ॥ ७० ॥
कोऽस्ति द्वारीति पृष्टा सा । मंत्रिणा न्यगदन्मृदु ॥ स्यादेष नित्यं मे गेहे । निश्चितागमनो नृपः
॥ ७१ ॥ युवापि प्रापितः कंप—वातं नाम्ना नृपस्य सः ॥ वक्षारके तयाक्षेपि । मंजूषायास्तृतीयके
॥ ७२ ॥ प्रदाय तालकं तत्र । सा द्वारमुदघाटयत् ॥ प्रवेश्य नृपतिं स्निग्धै—रलापैः समरंजयत्

---

दिशाउतरफ जोतोथको छानाछाना पगलांउथी चोरनीपेठे ते चहुटामां आव्यो. ॥ ६९ ॥ छेक नाशिकासुधी आवेला श्वासवाळो तथा कामरोगथी आतुर थयेलो ते राजा तेणीना घरपासे आवीने नखोथी बारणानो आगळीउ ठोकवा लाग्यो. ॥ ७० ॥ बारणे कोण छे? एम मंत्रीए पूछवाथी तेणीए धीमेथी कह्युं के आ वखते हमेशां मारे घेर आवनारो राजा होवो जोइये. ॥७१॥ युवान छतां पण राजाना नामथी तेने कंपवायु थयो, त्यारे तेणीए तेने पेटीना त्रीजा खानामां पूरी दीधो. ॥ ७२ ॥ पछी तेणीए त्यां तालुं देइने बारणुं उघाड्युं, तथा राजाने प्रवेश करावीने मिष्ट वचनोथी खुशी कर्यो. ॥ ७३ ॥ पछी तेणीए कह्युं के हे महाराज! आपने हुं स्नान करावुं,

P.P. Ac. Gunratnasuri M.S.		Jun Gun Aaradhak Trust

॥ ७३ ॥ स्नपये त्वं महाराज । रजन्यद्यापि न्यूयसी ॥ अस्नातांगस्य या केलि–स्तद्धि रासन्नचेष्टितं ॥ ७४ ॥ इति तद्वचसा यावत । स्नातुं प्रववृते नृपः ॥ संकेतितचरी श्वश्रू—स्तावद् द्वारे स्थिता जगौ ॥ ७५ ॥ उद्घाटय वधु द्वार–मद्यापि शयितासि किं ॥ तत् श्रुत्वा तां नृपः केय–मिति न्नी· त इवाभ्यधात् ॥ ७६ ॥ हसित्वा सावदद्देव । श्वश्रूर्मे गृहकर्मणि ॥ पृथग्गृहस्थितेयत्यां । वेलायां नित्यमेत्यसौ ॥ ७७ ॥ राजा दध्यौ जरत्यापि । गृहीतं दुर्यशो मम ॥ नवयौवनवद्भावि । जगत्त्रं·

---

केमके हजु रात्री घणी छे, वळी नाह्याविना जे कामक्रीडा करवी ते गझाचारजेवुं छे. ॥ ७४ ॥ एवी रीतना तेणीना वचनथी जेवामां राजा स्नान करवा लाग्यो तेवामां संकेत करी राखेली ते· णीनी सासु बारणे आवीने कहेवा लागी के, ॥ ७५ ॥ हे वहु ! द्वार उघाड? हजुसुधी शुं सुती पडी छुं? ते सांभळीने राजा जाणे डरी गयो होय नहि तेम बोल्यो के आ वळी कोण छे? ॥ ॥ ७६ ॥ त्यारे शीलवती हसीने बोली के जूदा घरमां रहेली मारी सासु हमेशां घरना कामका· जमाटे आ वखते अहीं आवे छे. ॥ ७७ ॥ त्यारे राजाए विचार्युं के आ मोकरीए पण जाणेलो मारो आ अपयश हवे युवान पुरुषनीपेठे आखा जगतमां फेलाइ जशे. ॥ ७८ ॥ सोइना अग्र

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

घनजांघिकं ॥ ७८ ॥ आराग्रे सर्षपो वह्नि–शिखायामिव पारदः ॥ स्त्रीस्वभावान्न हृद्यस्या । वार्त्तेयं स्थैर्यमाप्स्यति ॥ ७९ ॥ वार्धकस्य बलादेषा । निर्भया निरपत्रपा ॥ विगोपयति राजान–मपि रंक-मिव क्षणात् ॥ ८० ॥ वृद्धामूलोपवादोऽय—महो मे समुपस्थितः ॥ प्रमत्तः सप्रतिष्ठश्चे–द्विनष्टस्त-र्हि स ध्रुवं ॥ ८१ ॥ म्लानमित्यालपत्तं सा । पुरुषोत्तम मा क्लम ॥ इमामध्यास्व मंजूषां । याति यावज्जरत्यसौ ॥ ८२ ॥ मंजूषाया अथालीढे । तुर्यवक्षारकं नृपे ॥ सा तालकं ददौ बाढ—महो

---

भागपर जेम सर्षव तथा अग्निशिखामां जेम पारो तेम स्त्रीना स्वभावथी आ मोकरीना हृदयमां आ वात स्थिर रहेशे नहि. ॥ ७९ ॥ वृद्धपणाना बलथी आ मोकरी निर्भय तथा निर्लज्ज थइने क्षणवारमां मने राजाने पण रंकनीपेठे वगोवशे. ॥ ८० ॥ अरे! मारापर आ मोकरीए जोयेलो अपवाद आवी पड्यो! जो ते प्रमत्त अने प्रतिष्ठावाळो होत तो खरेखर नष्ट थात. ॥ ८१ ॥ ए-वी रीते झंखवाणा पडी गयेला ते राजाने तेणीए कह्युं के हे पुरुषोत्तम! तुं खेद न कर? ज्यां-सुधी आ मोकरी पाछी जाय त्यांसुधी तुं आ पेटीमां बेशी जा? ॥ ८२ ॥ पछी राजा ज्यारे ते पेटीना चोथा खानामां पेठो त्यारे तेणीए त्यां मजबूत तालुं दीधुं, अहो! स्त्रीजनुं पण धैर्य केवुं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धैर्यं हि योषितां ।। ८३ ।। न ग्रामपुरराष्ट्रेषु । माति यः सपरिच्छदः ।। मंजूषागह्वरे सोऽपि । ममौ नृपः स्वदोषतः ।। ८४ ।। फलकांतरितास्तस्यां । पेटायां ते द्विजादयः ।। तूष्णीकाः सुचिरं तस्थु- रौष्ट्रिका इव तापसाः ।। ८५ ।। विवृत्याथ तया द्वारं । श्वश्रूर्वेश्मन्यवेश्यत ।। तदीयं कंठमालंब्य । मुक्तकंठमरोदि च ।। ८६ ।। क्रंदसे किमकस्मात्त्वं । तयेत्युक्ता जगाद सा ।। किं ब्रुवे मंदभाग्याहं । सोमभूतिर्विज्ञाण यत ।। ८७ ।। विदेशस्थः समुद्रः प्रा—गुक्तमर्थं प्रपन्नवान् ।। आदृतो धर्मराजे-

होय छे! ।।८३।। जे राजा परिवारसहित गाम नगर अथवा राज्यमां पण समाय नहि ते पण पोताना दोषथी पेटीना खानामां समाइ गयो. ।। ८४ ।। वच्चे पाटीयां जडेली ते पेटीमां ते ब्राह्मणआदिक औष्ट्रिक तापसोनीपेठे घणा काळसुधी मौनपणे रह्या. ।। ८५ ।। पछी तेणीए बारणुं उघाडीने सासुने घरमां प्रवेश कराव्यो, तथा तेणीने कंठे वळगीने घांटो कहाडीने ते रडवा लागी. ।। ८६ ।। तुं अकस्मात केम रडे छे? एम तेणीए पूछवाथी ते शीलवती बोली के, अरे! हुं मंदभाग्यवाळी शुं कहुं? केमके सोमभूति ब्राह्मण कहे छे के, ।। ८७ ।। विदेशमां रहेला समुद्रदत्त प्रथम तो वर्णवेलो धनसमूह पाम्या, तथा पछी धर्मराजे आदर करवाथी सुरसंपत्ति पाम्या. ।।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न । प्राप्तोऽथ सुरसंपदं ॥ ८८ ॥ श्लेषोक्तिविदुषो वध्वा । व्याहृतं सरलाशया ॥ तयेति प्रतिपेदा-
ना । जज्ञे सापि विलापिनी ॥ ८९ ॥ विलोक्य प्रातिवेश्मिन्य—स्ते द्वे क्रंदनतत्परे ॥ तत्रैत्य रु-
रुदुस्तारं । तासां दूरे न दृग्जलं ॥ ९० ॥ सा च वार्त्ता वितस्तार । निखिलेऽपि पुरे क्रमात् ॥
वार्त्ता स्त्रीयानमारूढा । स्याद्वायोरपि जांघिकी ॥ ९१ ॥

अथेभ्या आययुस्तत्र । कर्तुं तस्योर्ध्वदेहिकं ॥ सर्वेऽपि तद्गृहद्वारि । संभूयैवं मिथोऽभ्यधुः

॥ ८८ ॥ श्लेषोक्ति एटले द्विअर्थी वचन बोलवामां चतुर एवी वहुए कहेलुं वचन सत्य मानीने स-
रल आशयवाळी तेणीनी सासु पण विलाप करवा लागी. ॥ ८९ ॥ एवी रीते तेओ बन्नेने रडती
जोइने पमोशनी स्त्रीओ पण त्यां आवीने मोटेथी रडवा लागी, केमके स्त्रीओनी आंखोमां आंसु
आववां कंइ छेटां नथी होतां. ॥ ९० ॥ पछी ते वात अनुक्रमे आखा शहेरमां फेलाइ गइ, के-
मके स्त्रीरूपी वाहनपर चडेली वात वायुथी पण वेगवाळी थाय छे. ॥ ९१ ॥

हवे तेनी मरणक्रिया करवामाटे त्यां शेठशाहुकारो आव्या, तथा तेओ सघला तेना घरने
बारणे एकठा थइने परस्पर कहेवा लाग्या के, ॥ ९२ ॥ आ समुद्रदत्त परदेशमां पुत्ररहितज म-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

॥ ए२ ॥ अपुत्र एव दूरस्थः । समुद्रोऽयं व्यपद्यत ॥ अपुत्रस्य भवत्येव । श्री राजकुलगामिनी ॥
॥ ए३ ॥ राजानुज्ञां विनास्यौकः । प्रवेष्टुं तन्न युज्यते ॥ सुलंघा ज्वलनज्वाला । दुर्लंघं राजशासनं ॥ ए४ ॥ इति ते सहिताः सर्वे । भवनं भूभुजो ययुः ॥ नास्थाने न च शुधांते । तैस्तदापि नृपतिः ॥ ए५ ॥ राज्ञोंतरगः सकल—स्तैरपृष्टि परिछदः ॥ पुनर्देवहृतस्येव । तस्य शुद्धिं न कोऽप्यवक् ॥ ए६ ॥ इतरेतरमालोच्य । तेऽथ मंत्रिगृहं ययुः ॥ न तत्र नोपभूपौक—स्तैर्लेभे स-

रण पाम्यो छे, अने पुत्ररहित मनुष्यनी लक्ष्मी राजकुलमांज जाय छे. ॥ ए३ ॥ माटे राजाना हुकमविना आना घरमां जवुं लायक नथी, केमके अग्निनी ज्वाला उलंगवी सारी, परंतु राजाना हुकमनुं उल्लंघन करवुं सारुं नथी. ॥ ए४ ॥ एम विचारीने तेओ सघला राजमंदिरे गया, परंतु सभामां के जनानामां क्यांय पण तेओने राजानो मेलाप थयो नहि. ॥ ए५ ॥ त्यारे तेओए राजाना सघला खानगी परिवारने पूछ्युं, परंतु जाणे कोइ देव तेने हरी गयो होय नहि तेम कोइये पण तेना समाचार कह्या नहि. ॥ ए६ ॥ पछी तेओ परस्पर विचार करीने मंत्रिने घेर गया, परंतु त्यां तेमज राजसभामां पण तेओने मंत्री मळ्यो नहि. ॥ ए७ ॥ त्यारे तेओ सिंहदत्त कोट-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चिवस्तदा ॥ ९७ ॥ आरक्षासिंहदत्तस्य । तेऽथ मंदिरमाययुः ॥ निःशासनो निधिरिव । न लेभे
सोऽपि तैस्तदा ॥ ९८ ॥ विलक्षास्ते ततो राज्ञः । कुमारं गुणसागरं ॥ योजितांजलयोऽभ्येत्य ।
प्रणम्येति व्यजिज्ञपत् ॥ ९९ ॥ वार्त्तां श्रुत्वाप्यकल्याणीं । समुद्रस्य प्रवासिनः ॥ तद्गेहं न प्रवि-
ष्टाः स्मो । यतः सोऽभूदपुत्रकः ॥ २१०० ॥ तत्कुमार प्रसद्याशु । प्रेष्यंतां निजपूरुषाः ॥ दृष्टुं त-
द्गेहसर्वस्वं । कुर्मो येनोर्ध्ववदेहिकं ॥ १ ॥ सोऽप्यूचे पुण्यवानस्मि । यत्केलिप्रियमद्य मां ॥ गौर-

---

वालने घेर गया, परंतु बेमालुम निधाननीपेठे ते पण तेउने मल्यो नहि. ॥ ९८ ॥ त्यारे वि-
लखा पडेला तेउ गुणोना समुद्रसरखा राजाना कुमारपासे आवीने हाथ जोडी प्रणाम करीने
विनंति करवा लाग्या के, ॥ ९९ ॥ विदेश गयेला समुद्रदत्तना मृत्युनी वात सांजलीने पण अ-
मो तेना घरमां गया नथी, केमके ते पुत्ररहित हतो. ॥ २१०० ॥ माटे हे कुमार! आप कृपा क-
रीने तेना घरनी मीलकत तपासवामाटे आपना माणसोने मोकलो? के जेथी अमो तेनी मरण-
क्रिया करीये. ॥ १ ॥ त्यारे ते राजकुमार पण बोल्यो के हुं पण पुण्यवान छुं के बालक्रीडा कर-
तो एवो जे हुं, तेनीपासे पिताजीना मानीता एवा तमो शेठीआउ आजे पोतानीमेळेज आवे-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्यास्तातपादाना-मिभ्या अन्याययुः स्वयं ॥ २ ॥ तत्तत्कार्येषु भूपाद्यै-रात्तवित्तफला अपि ॥ पुनः पुनः फलंतीभ्या । द्रुमा नित्यफला इव ॥ ३ ॥ परं नास्ति ममेदानीं । व्यापारोऽयं शिशोरिव ॥ जीवत्सु तातपादेषु । मंत्र्यारक्षकयोरिव ॥ ४ ॥ तैरूचिरे कुमारेंद्र । त्रयोऽप्येते व्यलोकिरे ॥ रत्नत्रयमिवाभ्न्यै—रस्माभिर्न तु लेभिरे ॥ ५ ॥ कुमारः स्माह संभ्रांत—मना भूमीधवादयः ॥ क्वामी अहो गता राज—रथसारथयस्त्रयः ॥ ६ ॥ चिंतां च पूर्वमेतेषां । करिष्याम्येष वस्ततः ॥ एवं तं

---

ला बे. ॥ २ ॥ अमुक अमुक कार्यप्रसंगे राजाआदिको जेउनुं धनरूपी फल जो के ले बे, तो पण नित्य फलतां वृक्षोनीपेठे ते शाहुकारो फरी फरीने फल्या करे बे. ॥ ३ ॥ परंतु हजु पिताजी हयात बतां जेम मंत्री अने कोटवालनुं तेम मारे बालकने हालमां आ कार्य करवानुं नथी. ॥४॥ त्यारे तेउ बोल्या के हे कुमारेंद्र! ते त्रणेनी अमोए तपास करी, परंतु अन्नन्योने जेम ( ज्ञानादिक ) त्रण रत्नो तेम अमोने तेउ मल्या नहि. ॥ ५ ॥ ते सांभली मनमां गन्नरायेलो कुमार बोल्यो के राजा, रथ अने सारथिसरखा ते राजाआदिक क्यां गया? ॥ ६ ॥ माटे प्रथम हुं तेउनी तपास करीश, अने पबी तमारुं कार्य करीश, एवी रीते तेने आम्मबरवालो जोइने महाजने

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वीक्ष्य साटोपं । पुनरूचे महाजनः ॥ ७ ॥ ऋजुस्वभाव मा वत्स—भूतो भाणीरिदं वचः ॥ न वे-
त्सि प्रहरिष्यंति । पुरं बलदृशो द्विषः ॥ ८ ॥ पूर्वं विज्ञप्तिमेतेषां । प्रमाणय गुणालय ॥ क्षुत्तृट्पी-
डास्पृशां वेला—विलंबः सहते न नः ॥ ९ ॥ तेनाथ प्रहिता वेश्म । समुद्रस्य स्वमंत्रिणः ॥ ग-
त्वा निरीक्ष्य संवेद्य । यथादृष्टं बभाषिरे ॥ १० ॥ स्वामिन् समुद्रसंबंधि—धनस्याशा विमुच्यतां ॥
तस्यैकः साधुशालाव—दिदानीमस्त्यकिंचनं ॥ ११ ॥ तत् श्रुत्वा विस्मितः प्राह । कुमारः प्रत्ययो

---

फरीथी कह्युं के ॥ ७ ॥ अरे भोळा! छोकरमत करीने तुं एम बोलमां? तने हजु खबर नथी के-
मके कदाच लाग जोनारा शत्रुओ आ नगर लेइ लेशे. ॥ ८ ॥ माटे हे गुणवान! प्रथम आ
लोकोनी विनंति तुं स्वीकार? केमके अमाराथी भुख्या तरस्या विलंब सहन थइ शकशे नहि. ॥
॥ ९ ॥ पछी ते राजकुमारे पोताना हजुरीओने समुद्रदत्तने घेर मोकल्या, तेओए पण त्यां जइ
जोइ तपासीने जेवुं हतुं तेवुं आवीने कह्युं के, ॥ १० ॥ हे स्वामी! तमारे समुद्रदत्त शेठना ध-
ननी आशा छोडी देवी, केमके तेनुं घर तो साधुना उपाश्रयनीपेठे कशी पण मिल्कतविनानुं
छे. ॥ ११ ॥ ते सांभळीने विस्मय पामेलो कुमार बोल्यो के मने तमारां वचनपर विश्वास आवतो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न. मे ॥ वाचि युष्माकमाकर्णि । यतोऽसौ प्राग्महाधनः ॥ १२ ॥ स्वयं गतोऽथ सोऽप्यात्त—फल-
पुष्पद्रुमोपमं ॥ तद्वेश्म सर्वथा निःश्रि । दृष्ट्वा शीलवतीं जगौ ॥ १३ ॥ कथयावितथं भद्रे । सा
विभूतिः क्व ते गता ॥ पश्चादपि हि ज्ञास्यंते । सहस्राक्षा महीभुजः ॥ १४ ॥ साथोचे वत्स द्र-
व्याशा—वेशाद्देशांतरंप्रति ॥ पतिर्मे प्रस्थितः सर्वं । गृहसारं सहानयत् ॥ १५ ॥ केवलं मां च
मंजूषां । चेमां भारकरीं पथि ॥ गृहे मुमोच को वेत्ति । यदस्या अस्ति कोटरे ॥ १६ ॥ परमार्था-

---

नथी, केमके पूर्वे ते महाधनाढ्य संभळायो छे. ॥ १२ ॥ पछी ते कुमारे पोते त्यां जइने पुष्प-
फल तोडी लीधेलां वृक्षसरखां तेना घरने सर्वथा धनरहित जोइने शीलवतीने कह्युं के ॥ १३ ॥
हे भद्रे! तुं सत्य कहे? तारी समृद्धि क्यां गइ? केमके हजारो आंखोवाला राजाउने पाछलथी
पण तेनी खबर पडी जशे. ॥ १४ ॥ त्यारे ते बोली के हे वत्स! द्रव्य मेलववानी आशाना आ-
वेशथी ज्यारे मारा स्वामीए देशांतरमां प्रस्थान कर्युं त्यारे घरनी तमाम मील्कत ते पोतानी सा-
थे लेइ गया छे. ॥ १५ ॥ केवल मने अने मार्गमां अति बोजो करनारी आ पेटीने ते घरमां
मुकी गया छे, परंतु कोने खबर के आ पेटीनी अंदर शुं हशे! ॥ १६ ॥ पछी परमार्थ नहि जा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नभिज्ञेन । मंजूषेक्षणहर्षिणा ॥ ततो नृपभुवादिष्टा । भृत्यास्तां शिरसो दधुः ॥ १७ ॥ निविष्टो नृ-
मिभृद्यत्र । नृश्कूटः समेखलः ॥ सा मंजूषाभवद्युक्तं । वोढॄणां भारकारणं ॥ १८ ॥ नृरिभारेयमि-
त्युक्त-स्तैः प्रीतो नृपनूर्जगौ ॥ रत्नस्वर्णादिभिः पूर्णा । मंजूषेयं भविष्यति ॥ १९ ॥ स्वं धामेत्य
सभालोके । लोकमाने सकौतुकं ॥ भित्वाद्यं तालकमसौ । मंजूषामुदघाटयत् ॥ २० ॥ ततस्तत्र-
त्यवक्तारा—ब्रह्मचिह्नविनाकृतिः ॥ प्राच्यात्परिचयाल्लक्ष्यः । प्रादुरासीत पुरोहितः ॥ २१ ॥ कथम-

---

णनारा अने पेटी जोइने खुश थयेला राजकुमारे हुकम करवाथी तेना नोकरोए ते पेटी मस्त-
कपर उपाडी. ॥ १७ ॥ जे पेटीमां घणा कूटवाळो ( शिखरोवाळो ) तथा कंदोरावाळो ( मेखला-
वाळो ) राजा ( पर्वत ) बेठेलो छे, ते पेटी उंचकनाराउने जे भार करनारी थइ ते युक्तज छे.
॥ १८ ॥ अहो! आ तो बहु भारवाळी छे! एम तेउंए कहेवाथी खुशी थयेलो राजकुमार बोल्यो
के खरेखर आ पेटी रत्न तथा स्वर्ण आदिकथी भरेली होशे. ॥ १९ ॥ पछी तेणे पोताने घेर
आवीने सभासदोनी नजरे कौतुकपूर्वक पहेलुं तालुं भांगीने ते पेटी उघाडी. ॥ २० ॥ त्यारे ते-
ना खानामांथी ब्रह्मचिह्नविनानी आकृतिवाळो तथा पूर्वना परिचयथी उळखी शकाय एवो पुरोहित

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्रागतोऽसीति । सभ्यै पृष्टो द्विजो जगौ ॥ मा मां पृच्छत पार्षद्याः । पश्यत प्रथमं पुरः ॥ २२ ॥
तालकेऽथाग्रिमे भिन्ने । तलारक्षो विनिर्ययौ ॥ वक्रारकांततः शैल—गह्वरादिव कौशिकः ॥ २३ ॥
एवं तृतीयतुर्याभ्यां । वक्राराभ्यां निरीयतुः ॥ मंत्री च मेदिनीशश्च । त्रपासंकुचिताननौ ॥ २४ ॥
अपास्तभूषा आपाणि—पादं खलितरंटिताः ॥ निर्विशेषाः सदृग्वेषा । जलार्द्रमात्रवाससः ॥ २५ ॥
ईयिवांसो भवपरा—वर्त्तादिव दशांतरं ॥ चत्वारस्ते चिरं चित्रं । न चक्रुः कस्य पश्यतः ॥ २६ ॥

---

प्रगट थयो. ॥ २१ ॥ अरे! आमां शीरीते तुं आव्यो? एम सभासदोए पूछवाथी ते ब्राह्मण बोल्यो के, हे सभासदो! तमो मने पूछो नहि, परंतु पहेलां आगल तपास चलावो? ॥ २२ ॥ हवे ते पछीनुं तालुं भांगवाथी पर्वतनी गुफामांथी जेम घुवड तेम ते खानामांथी कोटवाल निकल्यो. ॥ २३ ॥ एवी रीते त्रीजा अने चोथा खानामांथी लज्जाथी संकोचायेलां मुखवाळा मंत्री अने राजा निकल्या. ॥ २४ ॥ आभूषणविनाना अने छेक हाथथी पगसुधी खरडायेलां शरीरवाळा कंइ पण तफावतविना तुल्य वेषवाळा, अने फक्त जलथी भींजायेलां वस्त्रवाळा, ॥ २५ ॥ जाणे संसारचक्रमांथी बीजी दशाने प्राप्त थया होय नहि एवा ते चारे कया जोनार माणसने घणा का-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्राहुर्विनोदिनः केचि—दहो नाग्यं कुमार ते ॥ जिज्ञासिता श्रमी प्रादु—र्नूताश्च स्वयमेव यत् ॥
॥ २७ ॥ परे प्राहुरहो नक्ता । नृपेऽमात्यादयस्त्रयः ॥ न स्वस्वामिनमत्याक्षु—र्यदीदृक्संकटेऽप्यमी
॥ २७ ॥ दशां नीतोऽसि केनेमां । तात तं हन्मि वेद्मि चेत् ॥ एवं ब्रुवंतमाटोपा—त्पुत्रं नृपो
न्यवारयत् ॥ २ए ॥ जोषं नजेष संरंनो । वृथा तत्वं न बुध्यसे ॥ आकारय सदाकार । तामेव श्रे-
ष्टिनः प्रियां ॥ ३० ॥ राजाप्यथ समुत्थाय । धौतकायः शुनोदकैः ॥ सिंहासनमलंचक्रे । नव्यशृंगा-

---

ळसुधी श्राश्चर्य न करवा लाग्या? ॥ २६ ॥ वळी केटलाक मश्करान बोल्या के हे कुमार! तारुं
पण श्रहोनाग्य ठे! केमके जेननी तलास करवानी तारी इछा हती तेन श्रा पोतानीमेळेज प्र-
गट थया ठे! ॥ २७ ॥ बीजा केटलाक बोल्या के श्रहो! श्रा मंत्री श्रादिक त्रणे राजाना महा-
नक्तो जणाय ठे! केमके तेनए श्रावा संकटमां पण पोताना स्वामीने ठोड्यो नथी. ॥ २७ ॥
हे पिताजी! श्रापना श्रावा हाल कोणे कर्या ठे? तेने हुं जाणुं तो जीवथीज मारी नाखुं. एवी
रीते श्राडंबरथी बोलता एवा पोताना ते पुत्रने राजाए श्रटकाव्यो, ॥ २ए ॥ (श्रने कह्युं के)
हे उत्तम श्राकृतिवाळा पुत्र! तुं मौन रहे, तारो श्रा जुस्सो नकामो ठे, केमके खरी बिनानी तने

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

रन्नासुरः ॥ ३१ ॥ द्विजादयोऽपि ते स्नाता । निषेदुः परितो नृपं ॥ नृपाहूतायथौ तत्र । तदा सा शीलवत्यपि ॥ ३२ ॥ कुलदेवीमिवाभ्येत्य । मुक्तसिंहासनो नृपः ॥ तां नत्वा प्रणयपह्वो । योजितांजलिरस्तुत ॥ ३३ ॥ त्वं योषिज्जनभूषासि । त्वं वंद्यासि महासति ॥ विकटे संकटेऽपि स्वं । यन्निश्चयमपालयः ॥ ३४ ॥ वीरा अपि वयं नात्र । यं जेतुं प्रभविष्णवः ॥ त्वया त्वबलयाप्येष । विषमास्त्रो व्यजीयत ॥ ३५ ॥ विनश्यंति सतीनां हि । शापात्क्ष्मापा अपि क्षणात् ॥ महान् मयि प्र-

---

माहेती नथी. हवे शेठनी ते स्त्रीनेज तुं बोलाव? ॥ ३० ॥ पछी राजा पण उठीने तथा उत्तम जलथी शरीर धोइने नवा शृंगारथी देदीप्यमान थइने सिंहासनपर बेठो. ॥ ३१ ॥ वळी ते ब्राह्मणआदिक पण स्नान करीने राजानी आसपास बेठा, तथा राजाए बोलावेली ते शीलवती पण ते वखतेज त्यां आवी. ॥ ३२ ॥ त्यारे राजा सिंहासनपरथी उतरी सामे आवी प्रेमपूर्वक तेणीने नमीने हाथ जोडी स्तुति करवा लाग्यो के, ॥ ३३ ॥ हे महासति! तुं स्त्रीउमां मुकुटसमान तथा वंदन करवालायक छो, केमके आवा विकट संकटमां पण तें तारा शीलव्रतनुं रक्षण कर्युं छे. ॥३४॥ आमो सुभटो पण जेने जीती शक्या नहि एवा ते कामदेवने तें अबलाए पण जीती लीधो. ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सादोऽयं । जीवन्मुक्तोऽस्मि यत्त्वया ॥ ३६ ॥ जननीव सुतस्येद—मागस्त्वं सोढुमर्हसि ॥ गुरोरिव न ते शिक्षा । जीवतां विस्मरिष्यति ॥ ३७ ॥ विद्वान् विद्यावधिर्वंश्यो । गंभीरो गुणवानपि ॥ यत्त्वं विचिकृषे दोषः । स खलु प्राच्यकर्मणां ॥ ३८ ॥ प्राज्ञाः परःशताः संति । भुवि शूराः सहस्रशः ॥ जयत्यक्षाणि यः पंच । स वीरोऽतिबलः स हि ॥ ३९ ॥ भवलक्षसुखं शीलं । विषयाः क्षणसौख्य·

---

॥ ३५ ॥ सतीओना श्रापथी राजाओ पण क्षणवारमां विनष्ट थाय छे, परंतु तें तो मारापर मोटी कृपा करी के मने जीवतो मुक्यो. ॥ ३६ ॥ माता जेम पुत्रनो तेम तारे मारो आ अपराध माफ करवो, तथा गुरुनी जेम तारी आ शीखामण हुं जीवीश त्यांसुधी भुलीश नहि. ॥ ३७ ॥ (त्यारे शीलवती बोली के) विद्वान, विद्याओनी सीमासरखो, कुलीन, गंभीर तथा गुणवान एवो पण तुं जे विकारी थयो ते खरेखर तारां पूर्वकर्मनो दोष छे. ॥ ३८ ॥ आ पृथ्वीपर सेंकडोगमे विद्वानो तथा हजारोगमे शूरा माणसो छे, परंतु जे पांचे इंद्रिओने जीते छे, तेज सुभट तथा अतिबलवान छे. ॥ ३९ ॥ शील लाखोगमे भवोमां सुख देनारुं छे, अने विषयो क्षणमात्र सुख आपनारा छे, माटे एक क्षणमाटे कयो विचक्षण मनुष्य अनेक भवोनो विनाश करे? ॥ ४० ॥ जे मनु

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दाः ॥ विचक्षणः क्षणार्थं को । भवान्नैकान् विनाशयेत् ॥ ४० ॥ या चिंतामणिवज्जन्म—कोटी-
भिरपि दुर्लभा ॥ विदुषा डुष्यते सेयं । नरता न रताशया ॥ ४१ ॥ ततः परपुरंध्रीस्त्वं । राजन्ना-
जन्म वर्जय ॥ एवं जययशःकोशै–रतिस्फारः स्फुरिष्यसि ॥ ४२ ॥ तयैवं स्थापितः शीले । शैलेश
इव निश्चलः ॥ स स्वं विश्वं जगौ वृत्तं । राजा सामाजिकाग्रतः ॥ ४३ ॥ समक्षं भूभुजस्तस्या ।
आनीय सदनात्स्वयं ॥ ते लेखाभरणे सोम–भूतिर्भीतस्तदा ददौ ॥ ४४ ॥ चक्रे देशादनर्थाना—

ष्यपणुं चिंतामणि रत्ननीपेठे क्रोडोगमे भवोथी पण डुर्लभ ठे, तेने विद्वान माणस विषयवांछा-
थी दुषित करतो नथी. ॥ ४१ ॥ माटे हे राजन्! तुं जेक जीवितपर्यंत परस्त्रीनो त्याग कर? अने
एम कर्याथी तुं जय, यश तथा लक्ष्मीथी विस्तार पामीने आबादी मेलवीश. ॥ ४२ ॥ एवी रीते
शीलमां तेणीए स्थिर करेला राजाए पर्वतनीपेठे निश्चल थइने सभासदोनीपासे पोतानुं सघलुं
वृत्तांत कही संभलाव्युं. ॥ ४३ ॥ ते वखते सोमभूति ब्राह्मणे डरीने ते पत्र तथा आभूषण पोता-
नीमेळेज पोताने घेरथी लावीने राजानी समक्ष तेणीने आप्यां. ॥ ४४ ॥ आ अनर्थोनुं मूल
आ ब्राह्मण ठे, एम विचारीने पक्षी माळामांथी जेम मात्नना कांटाने तेम राजाए ते ब्राह्मणने दे-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मयं मूलमिति द्विजः ॥ राज्ञा बहिर्विहंगेन । नीमाद्दुर्वातितांडवत् ॥ ४५ ॥ शीलवत्यपि नृपेन ।
स्वगृहे प्रहितोत्सवैः ॥ परेषां च दुःप्रधर्षा—दहेरिव फणामणिः ॥ ४६ ॥
समयेऽथ समायातः । समुद्रः स विदेशतः ॥ शीललीलायितं श्रुत्वा । वध्वा बाढममोदत ॥
॥ ४७ ॥ तत्र ज्ञानत्रयखनिः । श्रीशीलगुरुरन्यदा ॥ आगाद्गौरयशःपूर–पूरिताखिलभूतलः ॥ ४८ ॥
तं नंतुं निर्ययौ नृमा—नमात्यादिभिरन्वितः ॥ दिव्ययानेन गीर्वाणै–रिव त्रिदिवनायकः ॥ ४९ ॥

---

शमांथी दूर कर्यो. ॥ ४५ ॥ अन्योथी न पकमी शकाय एवा सर्पनी फणापर रहेला मणिसरखी ते शीलवतीने पण राजाए उत्सवपूर्वक पोताने घेर मोकली. ॥ ४६ ॥

पछी केटलेक समये विदेशथी आवेला समुद्रदत्ते पोतानी स्त्रीनुं ते शीलचेष्टित सांभळीने तेणीनी प्रशंसा करी. ॥ ४७ ॥ हवे एक दिवसे निर्मल यशना समुहथी समस्त पृथ्वीतलने भर-नारा तथा त्रण ज्ञाननी खाणसरखा श्रीशील नामना गुरु त्यां आव्या. ॥ ४८ ॥ त्यारे देवोसहि-त जेम इंद्र तेम मंत्रिआदिक सहित राजा दिव्य वाहनमां बेशीने तेमने वंदन करवामाटे त्यां आव्यो. ॥ ४९ ॥ प्रत्यक्ष प्रभाववाळी महान औषधीसरखी शीलवतीसहित समुद्रदत्त पण ते गुरु-

